# લઘુ સપ્તશતી સ્તોત્રમ

નમો વિરિઞ્ચેર્વરવલ્લભાયૈ
નમોઽસ્તુ તે શઙ્કરવલ્લભાયૈ ।
નમોઽસ્તુ નારાયણવલ્લભાયૈ
શ્રીચણ્ડિકાયૈ શરણં પ્રપદ્યે ॥

બ્રહ્માદયો દેવિ ભજન્તિ દેવાઃ
વસિષ્ઠમુખ્યા ઋષયશ્ચ સર્વે ।
સિન્દૂરવર્ણાં તરુણાર્કકાન્તિં
શ્રીચણ્ડિકે ત્વાં સતતં સ્મરામિ ॥

શ્રીસિદ્ધિનાથ ભવતો ભુવનૈકભર્તુઃ
ભાષા પરામૃતમયી નિગમાન્તરસ્થા ।
એષા ત્વનન્યશરણસ્ય મમાશ્રુતસ્ય
વૃત્તા નિસર્ગકરુણાવરુણાલયસ્થા ॥

ૐ નમશ્ચણ્ડિકાયૈ

યત્કર્મ ધર્મનિલયં પ્રવદન્તિ તજ્જ્ઞા
યજ્ઞાદિકં તદખિલં સફલં ત્વયૈવ ।
ત્વં ચેતના યત ઈતિ પ્રવિચાર્ય ચિત્તે
નિત્યં ત્વદીયચરણૌ શરણં પ્રપદ્યે ॥ 1 ॥

પાથોઽધિનાથતનયાપતિરેષ શેષ–
પર્યઙ્કલાલિતવપુઃ પુરુષઃ પુરાણઃ ।
ત્વન્મોહપાશવિવશો જગદંબ સોઽપિ
વ્યાઘૂર્ણમાનનયનઃ શયનં ચકાર ॥ 2 ॥

તત્કૌતુકં જનનિ યસ્ય જનાર્દનસ્ય
કર્ણપ્રસૂતમલજૌ મધુકૈટભાખ્યૌ ।
તસ્યાપિ યૌ ન ભવતઃ સુલભૌ નિહન્તું
ત્વન્માયયા કબલિતૌ વિલયં ગતૌ તૌ ॥ 3 ॥

યન્માહિષં વપુરપૂર્વબલોપપન્નં
યજ્ઞાકનાયક પરાક્રમજિત્વરંચ ।
યલ્લોકશોકજનનવ્રતબદ્ધહાર્દં
તલ્લીયયૈવ દલિતં ગિરિજે ભવત્યા ॥ 4 ॥

યો ધૂમ્રલોચન ઈતિ પ્રથિતઃ પૃથિવ્યાં
ભસ્મીભભૂવ સમરે તવ હુઙ્કૃતેન ।
સર્વાસુરક્ષયકૃતે ગિરિરાજકન્યે
મન્યે સ્વમન્યુદહને કૃત એષ હોમઃ ॥ 5 ॥

કેષામપિ ત્રિદશનાયકપૂર્વકાણાં
જેતું ન જાતુ સુલભાવપિ ચણ્ડમુણ્ડૌ ।
તૌ દુર્મદૌ સપદિ યાંબરતુલ્યમૂર્તે
માતસ્તવાસિકુલિશાત્પતિતૌ વિશીર્ષૌ ॥ 6 ॥

દૌત્યેન તે શિવ ઈતિ પ્રથિતપ્રભાવો
દેવોઽપિ દાનવપતેઃ સદનં જગામ ।
ભૂયોઽપિ તસ્ય ચરિતં પ્રથયાઞ્ચકાર
સા ત્વં પ્રસીદ શિવદૂતિ વિજૃંભિતં તે ॥ 7 ॥

ચિત્રં તદેતમરૈરપિ યે ન જેયાઃ
શસ્ત્રાભિઘાતપતિતાદ્રુધિરાદપર્ણે ।
ભૂમૌ બભૂવુરમિતાઃ પ્રતિરક્તબીજાઃ
તેઽપિ ત્વયૈવ ગિલિતા વદને સમસ્તાઃ ॥ 8 ॥

આશ્ચર્યમેતદતુલં યદભૂત્સુરારી
ત્રૈલોક્યવૈભવવિલુણ્ઠનપુષ્ટપાણી ।
શસ્ત્રૈર્નિહત્ય ભુવિ શુંભનિશુંભસંજ્ઞૌ
નીતૌ ત્વયા જનનિ તાવપિ નાકલોકમ ॥ 9 ॥

www.bharatiweb.com

ત્વત્તેજસિ પ્રલયકાલહુતાશનેટસ્મિન
યસ્મિન પ્રયાન્તિ વિલયં ભુવનાનિ સદ્યઃ ।
તસ્મિન નિપત્ય શલભા ઈવ દાનવેન્દ્રા
ભસ્મીભવન્તિ હિ ભવાનિ કિમત્ર ચિત્રમ ॥ 10 ॥

તત કિં ગૃણામિ ભવતીં ભવતીવ્રતાપ-
નિર્વાપણપ્રણયિનીં પ્રણમજ્જનેષુ ।
તત કિં ગૃણામિ ભવતીં ભવતીવ્રતાપ-
સંવર્ધનપ્રણયિનીં વિમતસ્થિતેષુ ॥ 11 ॥

વામે કરે તદિતરે ચ યથોપરિષ્ટાત
પાત્રં સુધારસભૃતં વરમાતુલુઙ્ગમ ।
ખેટં ગદાં ચ દધતીં ભવતીં ભવાનીં
ધ્યાયન્તિ યેટરુણનિભાં કૃતિનસ્ત એવ ॥ 12 ॥

યદ્વારુણાત્પરમિદં જગદંબ યસ્તે
બીજં સ્મરેદનુદિનં દહનાદિરૂઢમ ।
માયાઙ્કિતં તિલકિતં તરુણેન્દુબિન્દુ-
નાદૈરમન્દમિહ રાજ્યમસૌ ભુનક્તિ ॥ 13 ॥

અન્તઃ સ્થિતાપ્યખિલજન્તુષુ તન્તુરૂપા
વિદ્યોતસે બહિરિહાખિલવિશ્વરૂપા ।
કા ભૂરિ શબ્દરચના વચનાતિગાસિ-
દીનં જનં જનનિ મામવ નિષ્પ્રપઞ્ચમ ॥ 14 ॥

આવાહનં યજનવર્ણનમગ્નિહોત્રં
કર્માર્પણં ત્વયિ વિસર્જનમત્ર દેવિ ।
મોહાન્મયા કૃતમિદં સકલાપરાધં
માતઃ ક્ષમસ્વ વરદે બહિરન્તરસ્થે ॥ 15 ॥

એતત્પઠેતનુદિનં દનુજાન્તકારિ
ચણ્ડીચરિત્રમતુલં ભુવિ યસ્ત્રિકાલમ ।
શ્રીમાન સુખી સ વિજયી સુભગઃ ક્ષમઃ સ્યાત
ત્યાગી ચિરન્તનવપુઃ કવિચક્રવર્તી ॥ 16 ॥

શ્રીસિદ્ધનાથપરનામધેયઃ
શ્રીશંભુનાથો ભુવનૈકનાથઃ ।
તસ્ય પ્રસાદાત સુલભાગમશ્રીઃ
પૃથ્વીધરઃ સ્તોત્રમિદં ચકાર ॥ 17 ॥

પ્રથમા વિષ્ણુમાયા ચ દ્વિતીયા ચેતના તથા ।
બુદ્ધિર્નિદ્રા ક્ષુધા છાયા શક્તિસ્તૃષ્ણાસ્તથાષ્ટમી
॥ 18 ॥

ક્ષાન્તિર્જાતિસ્તથા લજ્જા શાન્તિઃ શ્રદ્ધા ચ કાન્તિકા
।
લક્ષ્મીર્વૃત્તિઃ સ્મૃતિશ્ચૈવ દયા દીપ્તિસ્તથૈવ ચ
॥ 19 ॥

તુષ્ટિઃ પુષ્ટિસ્તથા માતા ભ્રાન્તિઃ સર્વાત્મિકા તથા ।
ત્રયોવિંશતિસંખ્યાતા યા દેવી ગણિતા શુભા ।
ભુક્તિર્મુક્તિર્નદૂરસ્થા શુદ્ધપાઠવતાં નૃણામ ॥ 20 ॥

દેવ્યાઃ સ્તવં જ્ઞાનમયં કૃતં યત
પૃથ્વીધરાચાર્યવરેણ સમ્યક ।
યચ્ચોદ્ધૃતં સપ્તશતીસ્થસારં
સર્વાન્વિતં તન્નિગમસ્ય સારમ ॥ 21 ॥

॥ ઈતિ લઘુ સપ્તશતી સ્તોત્રં સંપૂર્ણમ ॥